# बालमुकुन्दाष्टकम्

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥ १॥

संहृत्य लोकान्वटपत्र मध्ये शयान माद्यन्त विहीन रूपम् ।
सर्वेश्वरं सर्व हितावतारं बालं मुकुन्दं मनसा स्मरामि ॥ २॥

इन्दीवर श्यामल कोमलाङ्गं इन्द्रादि देवार्चित पादपद्मम् ।
सन्तान कल्पद्रुम माश्रितानां बालं मुकुन्दं मनसा स्मरामि ॥ ३॥

लम्बालकं लम्बित हारयष्टिं शृङ्गार लीलाङ्कित दन्त पङ्क्तिम् ।
बिंबाधरं चारु विशाल नेत्रं बालं मुकुन्दं मनसा स्मरामि ॥ ४॥

शिक्ये निधायाद्य पयो दधीनि बहिर्गतायां व्रजनायिकायाम् ।
भुक्त्वा यथेष्टं कपटेन सुप्तं बालं मुकुन्दं मनसा स्मरामि ॥ ५॥

कलिन्दजान्त स्थित कालियस्य फणाग्र रङ्गे नटन प्रियन्तम् ।
तत्पुच्छ हस्तं शरदिन्दु वक्त्रं बालं मुकुन्दं मनसा स्मरामि ॥ ६॥

उलूखले बद्ध मुदार शौर्यं उत्तुङ्ग युग्मार्जुन भङ्गलीलम् ।
उत्फुल्ल पद्मायत चारुनेत्रं बालं मुकुन्दं मनसा स्मरामि ॥ ७॥

आलोक्य मातुर्मुख मादरेण स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं देव मनन्तरूपं बालं मुकुन्दं मनसा स्मरामि ॥ ८॥

॥ इति श्री बालमुकुन्दाष्टकं सम्पूर्णम् ॥